This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/



(नं.६६) ॥अथपरमार्थसारः॥

॥श्रीगणेशायनमः॥ ॐनमःशिवाय॥ ॐ॥ परं परस्थं गहनादनादिमे
कं निविष्टं बहुधागुहासु॥ सर्वालयं सर्वचराचरस्थं त्वामेव शंभुं शरणं प्र
पद्ये॥१॥ गर्भाधिवासपूर्वकमरणान्तकचक्रे×दुःख×विश्रान्तः॥ आधारं भ
गवंतं शिष्यः पप्रछ परमार्थम्॥२॥ आधारकारिकाभिस्तं गुरुरभिभाषते स्म
तत्सारं॥ कथयत्यभिनवगुप्तः शिवशासनदृष्टियोगेन॥३॥ निजशक्तिवैभवय
भरादं ऽ चतुष्टयमिदं विभागेन। शक्तिर्मायाप्रकृतिः पृथ्वी चेति विभा
तं प्रभुणा॥४॥ तत्रान्तर्विश्वमिदं विचित्रतनुकरणभुवनसंतानं॥ भोक्ता
च तत्र देही शिव एव गृहीतपशुभावः॥५॥ नानाविधवर्णानां रूपं धत्ते य
थामलः स्फटिकः॥ सुरमानुषपशुपादपरूपत्वं तद्वदीशोऽपि॥६॥ गच्छति

Acc. No. ~~4261~~ M-1623
Title - परमार्थसारः
Author - अभिनवगुप्ताचार्य.
Date - ?
Sub - शैवागम, स्तोत्र.
folio - 8
Xerox - 16.

Checked 2012

K K S U LIBRARY
RAMTEK
441 106
M-1623
Dist Nagpur

॥१॥

गच्छतिजलदेवहिमकरबिंबंस्थितेस्थितिंयाति॥तनुकरणभुवनवर्गेतथा
यमात्मामहेशानः॥७॥स्फुरदन्योपियथाशशिबिंबस्वच्छःप्रकाशतेतद्व
त्सर्वगतोप्ययमात्माविषयाश्रयणेनधीमुकुरे॥८॥आदर्शेमलरहितेयद्वद्व
दनंविभातितद्वदयं॥शिवशक्तिपातविमलेधीतत्वेभातिभारूपः॥९॥भारूपपरि
पूर्णंस्वात्मनिविश्रांतितोमहानंदं॥इच्छासंवित्करणैर्निर्भरितमनंतशक्तिपरि
पूर्णं॥१०॥सर्वविकल्पविहीनंशुद्धंशांतंलयोदयविहीनं॥यत्परतत्वंतस्मिन्वि
भातिषट्त्रिंशदात्मजगत्॥११॥दर्पणबिंबेयद्वन्नगरग्रामादिचित्रमविभा
गि॥भातिविभागेनैवचपरस्परंदर्पणादपि॥१२॥विमलतमपरमभैरवबो
धात्तद्वद्विभागशून्यमपि॥अन्योन्यंचततोपिचविभक्तमाभातिजगदेतत्॥१३॥
शिवशक्तिसदाशिवतामीश्वरविद्यामयींचतत्वदशां॥शक्तीनांपंचानांविभ

॥१॥

2

त्स्वभावेन भासयति ॥१४॥ परमं यत्स्वातंत्र्यं दुर्घटसंपादनं महेशस्य । देवीमाया
शक्तिः स्वात्मावरणं शिवस्यैतत् ॥१५॥ मायापरिग्रहवशाद्बोधो मलिनः पुमा
न्पशुर्भवति । कालकलानियतिवलाद्रागविद्यावशेन संबद्धः ॥१६॥ अधुने
व किंचिदेवेदमेव सर्वात्मनैव जानामि ॥ मायासहितं कंचुकमणोरंतरंगमिद
मुक्तं ॥१७॥ कंचुकतंडुलमिव कणविनिविष्टं विभिन्नमप्यभिदां ॥ भजते तत्तु
विशुद्धिं शिवमार्गौन्मुख्ययोगेन ॥१८॥ सुखदुःखं मात्रं निश्चयसंकल्पनाभि मोह
मानश्च ॥ प्रकृतिरथांतःकरणं बुद्धिमनोऽहंकृति क्रमशः ॥१९॥ श्रोत्रंत्व
गक्षि रसना घ्राणं बुद्धीन्द्रियाणि शब्दादौ ॥ वाक्पाणिपादपायूपस्थं कर्मेन्द्रिया
णि पुनः ॥२०॥ एषां ग्राह्यो विषयः सूक्ष्मः प्रविभागवर्जितो यः स्यात् ॥ तन्मा

॥२॥

त्रपंचकं तच्छब्दः स्पर्शो महो रसो गंधः ॥२१॥ एतत्संसर्गवशात्स्थूलो विषयस्तु
भूतपंचकं तो ॥ आत्मेति नभः पवनस्तेजः सलिलं च पृथ्वी च ॥२२॥ तुषद्वतं
डुलकालिकामाव्दणुते प्रसृति पूर्वकः सर्गः ॥ पृथ्वीपर्यंतो यं चैतन्यं देहभावे
न ॥२३॥ परमावरणं मनोऽहह सूक्ष्मं मायादिकंचुकं स्थूलं ॥ बाह्यविग्रहरूपं को
शत्रयं चेष्टितो ह्यात्मा ॥२४॥ अज्ञानतिमिरयोगादेकमपि स्वभावमात्मानं ॥
ग्राह्यग्राहकनानावैचित्र्येणावबुध्येत ॥२५॥ रसफाणितशर्करिकागुडखं
डाद्या यथेक्षुरसस्य व ॥ न द्वैदयस्तु भेदाः सर्वपरमात्मनः शंभोः ॥२६॥ वि
ज्ञानांतर्यामिप्राणविराड्देहजातिपिंडान्तुः ॥ व्यवहारमात्रमेतत्परमार्थेन तु
संत्येव ॥२७॥ रज्वां नास्ति भुजंगस्त्रासं कुरुते च मरणपर्यंतं ॥ भ्रांतेर्महती शक्ति

॥२॥

नयं

नैविवेकुं शक्यन्ते नाम ॥२८॥ तद्वद्धर्मो धर्म स्वर्निरयो जन्ममरणासुखदुःखं
वर्णाश्रमादि वा मन्यस्तदपि विभ्रमबलाद्भवति ॥२९॥ एतन्तेदं प्रकारं तद्भावे
पु प्रकाशमाने तथा ॥ आत्मानतिरिक्तेपि भवत्यनात्माभिमानोयं ॥३०॥
तिमिरादपि तिमिरमिदं गंडस्योपरि महान्स्फोटः ॥ यदनात्मन्यपि देहप्राणादा
वात्ममानित्वं ॥३१॥ देहप्राणविमर्शनधीर्ज्ञानेनः प्रपंचयोगेन ॥ आत्मानं
चेष्टयते चित्रं जाले नजालकार इव ॥३२॥ स्वज्ञानविभवभासनयोगेनोद्वेष्ट
यन्निजात्मानं ॥ इति बंधमोक्षचित्रां क्रीडां प्रतनोति परमशिवः ॥३३॥ सृष्टिस्थि
तिसंहारा जाग्रत्स्वप्नौ सुषुप्तमिति तस्मिन् ॥ भाति तुरीये धामनि तथापि तैरावृ
तं भाति ॥३४॥ जाग्रद्विश्वं तेदास्स्वप्नस्तैजः प्रकाशमाहात्म्यात् ॥ प्राज्ञः स्वप्नावस्था

5

॥२॥

ज्ञानघनतानतः परं तुर्यं ॥३५॥ जलधरधूमरजोभिर्मलिनी क्रियते न यथा
गगनतलत्वं ॥ तद्वन्मायाविकृतिभिरस्पृष्टः परः पुरुषः ॥३६॥ एकस्मिन्
घटगगने रजसा व्याप्ते भवंति नान्यानि ॥ मलिनानि तद्वदेते जीवाः सुखदुः
खभेदजुषः ॥३७॥ श्रांते श्रांत इवायं हृष्टे हृष्टो विमोहवति मूढः ॥ न त्वगणो
स्तिभगवान् न पुनः परमार्थतः स तथा ॥३८॥ यदनालम्बपि नद्रूपावभास
मानं तसुरा निराकृस ॥ आसन्नमनात्मरूपा भ्याति विदलयुति परमात्मा ॥
३९॥ दृष्टिविभ्रमयुगलकसमूलविछेदने कृतार्थस्य ॥ कर्तव्यान्तरकल्प
नाजातु न परयोगिनो भवति ॥४०॥ पृथ्वीप्रकृतिर्मायात्रितयमिदं वेद्यरूप
तापतितं ॥ अद्वैतभावनबलाद्भवति हि सन्मात्रपरिशेषं ॥४१॥ रशनाकुंडलक

॥३॥

टङ्कभेदत्यागेन दृश्यते यथा हेम ॥ तद्वद्भेदत्यागे सन्मात्रं सर्वमाभाति ॥४२॥ न द्रष्टृ
परं शुद्धं शान्तमभेदात्मकं सममसकलं ॥ अमृतं ससंशान्तो विश्रामति भास्वरूपाया
मू ॥४३॥ इत्थं न दृतिवेद्यतदृतिसंपाद्यतदृतिश्च भास्वरूपेण ॥ अपरामृष्टस्तदपि
तु नभः प्रसृतेन नामस्येति ॥४४॥ शक्तित्रिशूलपरिगमयोगेन समस्तमपि परमे ॥ शिवना
म्नि परमार्थे विसृज्यते देवदेवेन ॥४५॥ पुनरपि च पञ्चशक्तिप्रसरणक्रमेण बहिर
पितत् ॥ अंडत्रयं विचित्रं संवेहिरात्मलाभेन ॥४६॥ इति शक्तिचक्रयंत्रं क्रीडायो
गेन वाहयन् देवः ॥ अहमेव शुद्धरूपः शक्तिमहाचक्रनायकपदस्थः ॥४७॥ मय्ये
व भाति विश्वं दर्पण इव निर्मले घटादीनि ॥ मत्तः प्रसरति सर्वं स्वच्छविचित्रत्वमिव
सुहात् ॥४८॥ अहमेव विश्वरूपः करचरणादिस्वभाव इव देहः ॥ सर्वस्मिन्नेहमेव
स्फुरामि भावेषु भास्वरूपमिव ॥४९॥ द्रष्टा श्रोता घ्राता देहेन्द्रियवर्जितोप्यकर्त्तापि ॥

॥४॥ सिद्धांतागमलक्षं श्रित्वा नहमेव रचयामि ॥५०॥ द्वैं द्वैतं नाविकल्पे गलितं मे प्रोक्तं धिनी
मायाम् ॥ सलिले सलिलं क्षीरे क्षीरमेव भूललिलयो स्यात् ॥५१॥ एतेन तत्वसमूहे
भावनया शिवमपि तत्त्वमलिंयाते ॥ कः शोकः को मोहः सर्वं ब्रह्मावलोकयतः ॥५२॥
कर्मफलं शुभमशुभं मिथ्याज्ञाने न संगमादेव ॥ विषमो हि तुगरुविषतस्करयोगोप्य
तस्करस्यैव ॥५३॥ नो कव्यव्यवहारकृतां यदि हा विद्यामुपासते मूढाः ॥ तेषां तिजन्म
म सु धर्माधर्मार्गलाबद्धाः ॥५४॥ अज्ञानकालनिचितं धर्माधर्मात्मकं तु कर्म
पि ॥ चिरसंचितमपि तत्क्षणेन नश्यति विज्ञानदीप्तिवशात् ॥५५॥ ज्ञानप्राप्तौ कृत
मपि न फलाय ततो सज्जन्म कथं ॥ गतजन्मबंधयोगो भाति शिवार्कः स्वदीधितिभिः ॥५६
तुषकंचुकं किं गात्रकमुसंबीजं यथांकुरं कुरुते ॥ नैवं तथा मल्ले मायाकर्मविमुक्तो
भवांकुरं ह्यात्मा ॥५७॥ आत्मज्ञानकुलश्च न बिभेति सर्वहितस्य निजरूपं ॥ नैवं वी ॥४॥

चतियस्मात्परमार्थेनाशितानास्ति॥५८॥अतिगूढहृदयगतप्रगूढपरमार्थ
रत्नसंचयतः॥अहमेवेतिमहेश्वरभावेकादुर्गतिःकस्य॥५९॥मोक्षस्यनैवकिं
चिद्धामास्तिनचापिगमनमन्यत्र॥अज्ञानग्रंथिभिदास्वशक्तिभिर्व्यक्तता
मोक्षः॥६०॥भिन्नाज्ञानग्रंथिर्गतसंदेहःपराकृतभ्रांतिः॥प्रक्षीणपुण्यपा
पोविग्रहयोगेप्यसौमु क्तः॥६१॥अग्न्याभिदग्धंबीजंयथाप्ररोहासमर्थतामे
ति॥ज्ञानाग्निदग्धमेवंकर्मनजन्मप्रदंभवति॥६२॥परिमितबुद्धित्वेनहिक
र्मोचितभाविदेहभावनया॥संकुचिताचितिरेतेदेहध्वंसेतथाभाति॥६३॥ य
यदिपुनरमलंबोधंसर्वसमुत्तीर्णबोद्धृकर्तृमयं॥विततमनस्तोदितभारू मितो
पंसत्यसंकल्पं॥६४॥दिक्कालकलनविकलंध्रुवमव्ययमीश्वरंसुपरिपूर्णम्॥

बहुनरशक्तिव्रातप्रलयोदयविरच्यैनैर्धकर्तीमम्॥६५॥ सद्ध्यादिविधिसुवेध
समाप्त्मानश्रिचमयंविबुध्येत॥ कथमिवसंसारीस्याद्धितलस्यकुतः क्ववासंसरत्वो॥
६६॥ इतियुक्तिभिरपिसंद्वयकर्मज्ञानिनोनसफलमिति॥ नममेदमपितुन
स्येतिद्दाढ्यतोनहिफलंलोके॥६७॥ इत्थंसंकल्पविकल्पान्प्रतिबुद्धोभावनासम
रणतः॥ आत्मज्योतिषदीप्तेजुक्रज्योतिर्मयोभवति॥६८॥ अभ्यन्यद्दूतद्वासं
वीतोयेनकेनचिच्छादितः॥ यत्रक्वचननिवासीविमुच्यतेसर्वभूतात्मा॥६९॥ ह
यमेधसहस्राण्यपिकुरुतेवाप्रलयघातलक्षाणि॥ परमार्थविन्नपुण्यैर्नचपापैर्लि
प्यतेविमलः॥७०॥ मदहर्षकोपमन्मथविषादभयलोभमोहपरिवर्जी॥ निस्तोवक
षट्कारोजडइवविचरेदवादमतिः॥७१॥ मदहर्षप्रभृतिरयंवर्गःप्रभवतिवि

भेदसंमोहनात्॥ अद्वैतास्मि विबोधस्तेन क्वचिंस्य त्यतांनाम॥७२॥ स्तुसंवा होत थेना
स्यव्यतिरिक्तमस्ति न च॥ स्तोत्रादिनासतु थेदुतः॥ त्मात्रिनमस्कृतिवंद्यकः॥७३॥ षट्
त्रिंशत्तत्वात्मकं विग्रहरचनागवाक्षपरिपूर्णम्॥ निजमन्मदस्थशरीरं घटादिवातस्य
देवगृहं॥७४॥ तत्र परमात्ममहाभैरवशिवदेवः॥ स्वशक्तियुतो॥ आत्माविमृष्टैनवि
मलद्रव्यैः पूजयन्नास्ते॥७५॥ बहिरन्तरपरिकल्पनभेदमहाबीजनिचयमर्पयतः॥
तस्यातिदीप्तसंविज्ज्वलने यत्नाद्विनो भवति होमः॥७६॥ ध्यानमनेन स्तमितं पुनरेव
हि भगवान् विचित्ररूपाणि॥ सृजेति तदेव हि ध्यानं संकल्प्य लिखितसत्स्वरूपत्वं॥
७७॥ भुवनावलीसमस्तात्त्वक्रमकल्पनामथाक्षगणं॥ अंतर्बोभेपरिवर्तें यतिय
तोऽस्य जपमुदितः॥७८॥ सर्वे समया दृष्ट्या दसत्यरूपतियखसंविदमनुते॥ विश्वम
मौनिरतो विग्रहरचनांगकल्पनाकलितो॥७९॥ विश्वरसासवपूर्णे निजकरगं वै

घटखंडककपालं॥ रसयति च यत्तदेतद्भूतमस्य सुदुर्लभं सुलभं च॥८०॥ इतिजन्मना
शहीनं परमार्थमहेश्वरं चराचरव्याप्तमुपलभ्य॥ उपलब्धुताप्रकाशात्मतत्त्वकस्य स्तिष्ठति
यथेष्टं॥८१॥ व्यापिनमभिहितमित्थं सर्वात्मानं विधूतनानात्वं॥ निरुपमपरमा
नंदं यो वेत्ति स तन्मयो भवति॥८२॥ तीर्थे श्वपचगृहे वा नष्टस्मृतिरपि परित्यजन्
देहं॥ ज्ञानसमकालमुक्तः कैवल्यं याति हतशोकः॥८३॥ पुण्यायतीर्थसेवोनि
रयोः श्वपचसदननिधनगतिः॥ पुण्यापुण्यकलंकस्पर्शाभावात्तु किं तेन॥८४॥
तुषकंचुकसुश्लिष्टं तंडुलकणं तुषदलांतरापेक्षः॥ तंडुलकणस्य कुरुते न पुनस्त
द्रूपतां हि तस्मा॥८५॥ तद्वत्कंचुकपटली पृथक्कृता साधु शस्त्रसंस्कारात्॥ तिष्ठत्यपि मु
क्तोल्लातेत्यन्त्रवर्जिता भवंति॥८६॥ कुशलतमशिल्पिकल्पितविमलीभावः समु

रक्तोपाधेः॥ मलिनोपि मणिरूपाधौ विच्छेदे स्वच्छपरमार्थः॥८७॥ एवंसंसृतस्या
सन विमलस्थितिस्संवेदनं तदुपाधेः॥ मुक्तमुपाध्यंतरमन्यमाभाति जीवरूपं
८८॥ शास्त्रादिप्रामाण्याद्दविचलितमथ कृत्याहितन्मतां॥ प्राप्तः स एवमेवस्व
र्गं नरकं मनुष्यत्वं॥८९॥ अंसक्षणस्तु तस्मिन्पुण्यापापाच वास्थितिं पुष्यन्॥
मूढानां सहकारीभावं गच्छति गतो तु न स हेतुः॥९०॥ येपि तरात्मने नावदुः
पशुपक्षीसरीसृपास्य स्वगतिं॥ तेपि पुरातनसंबोधसंस्कृतात्तां गतिं याभि
९१॥ स्वर्गमयो निरयमयः तस्य देहान्तरालगः पुरुषः॥ न ह्यंगस्तोचित्यादे
हान्तरयोगमभ्येति॥९२॥ एवं ज्ञानावसरे स्यात्मा सकृद्दस्य यादृशो भातुः॥ जो
दृश एवं स दासो न देहपाते न्यथा भवति॥९३॥ करणगणसंप्रमोषः स्मृतिनाशः
श्वासकेलिलता विच्छेदः॥ मर्मसु रुजा विशेषा शरीरसंस्कारजो भोगः॥९४॥ मरमा

रूपं

र्थमार्गमेनक्षत्यिति यद्गुरुमुखात्समप्येति ॥ अतितीव्रशक्तिपातात्तेदेवनिर्विघ्न
मेवाशिवः ॥१५॥ सर्वोत्तीर्णसोपानपदक्रमेणसंश्रयतः ॥ परतत्त्वेसो [illegible] लाभेप
यैते नित्यं मयीभावः ॥१६॥ तस्यतुपरमार्थमयीधारामगतस्यमध्यविश्रांतेः ॥ त
त्सद्लाभे सुकृचेतसोपिमरणं कदाचित्स्यात् ॥१७॥ योगभ्रष्टः शास्त्रे कथितोसौ
चित्रभोगभुवनपतिः ॥ विश्रांतस्थानवशाद्देवाजन्मान्तरेत्रावी भवति ॥१८
परमार्थमार्गमेनमभ्यस्याप्राप्ययोगमपिनाम ॥ सुरलोकभोगभोगीमुदितामनसा
मोदतेसुचिरं ॥१९॥ विषयेषुसार्वभौमः सर्वजनैः पूज्यते पृथाराजा ॥ भुवनेषु
सर्वदेवैर्योगभ्रष्टस्तथापूज्यः ॥२०॥ महताकालेनपुनर्मानुषमाप्ययोगम
भ्यस्य ॥ प्राप्नोतिदिव्यममृतं तस्मोद्येदावर्तनेनपुनः ॥२१॥ तस्मात्तन्मार्गेस्मिन्न
निरतोयः कश्चिदास्तिसन्निवत्यं ॥ इतिमत्वा परमार्थे यथा तथापिप्रयतनीयं ॥२॥

(पृ. ६६)

॥लिंगानिसौभाग्यसुधोदयेप्रपंचितानि।पुनरेवकामपीठेतदग्रकोणस्थितेमनोरूपे।
प्रतिफलितेतज्ज्योतिःस्वयंभूलिंगंसमीरितंसद्भिः॥१॥दक्षिणकोणेहृदातिरूपे
जालंधरेतुसंक्रांतं॥परवामकोणलिंगंज्ञानसंज्ञारूपाभिधेदवशात॥२॥मध्य
त्रिकोणकोणेवामेश्वरीपूर्णपीठमेतस्मिन्॥बुद्धिमयंपरतेजःप्रतिफलितंमितरालिं
गंतांयाते॥३॥चिन्मयेश्रीपीठज्योतिर्विंदोयदस्यसंक्रांतं॥प्रतिफलितेपरधा
म्नःपरलिंगंतत्त्वकीर्तितंआद्ये॥४॥लीनंबाह्येन्द्रियागोचरंचिद्रूपमर्धंगमयंतीति
लिंगानिमनोबुध्यहंकारचित्तात्मकानिकामरूपादीनिचित्स्फुरत्ताधारत्वात्पीठा
निएतेषांतःकरणचतुष्टयरूपेषुपीठेषुतत्तद्वृत्तिचतुष्टयमयानिलिंगानिस्वयंभ्वा
दीनिनिवसंतीत्यर्थः॥

४२६१

KKSU LIB
RAMTEK
441 106
M-1623
Dist. Nagpur

इदमभिनवगुप्तोदितसंक्षेपंध्यायतः परंब्रह्म॥अचिरादेवशिवत्वंनिर्मल
हृदयावेशमभ्येति॥आर्याशतेन तदिदंसंक्षिप्तंशास्त्रसारमतिगूढं॥अभि
नवगुप्तेनमयाशिवचरणस्मरणदीप्तेन॥१०४॥ ॥इतिश्रीमहामाहे
श्वराभिनवगुप्ताचार्येणविरचितः परमार्थसारः समाप्तः॥ ॥शुभमस्तु

```
[OrderDescription]
,CREATED=23.09.20 10:21
,TRANSFERRED=2020/09/23 at 10:24:10
,PAGES=16
,TYPE=STD
,NAME=S0003652
,Book Name=M-1623-PARMATHARSHAR
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,
```